# ॥ षोडश मातृका मण्डलम् ॥




**गौरी पद्मा शची मेधा, सावित्री विजया जया।**
**देवसेना स्वधा स्वाहा, मातरो लोकमातरः ॥**
**धृतिः पुष्टिस्तथा तुष्टिः, आत्मनः कुलदेवता।**
**गणेशेनाधिका ह्येता, वृद्धौ पूज्याश्च षोडश ॥**

पीढे पर लाल वस्त्र के उपर सोलह स्थानों पर गेहूं या चावल की डेरी पर सोलह सोपारी रख दें। पश्चिम से पूर्व की ओर मातृकाओं की स्थापना निम्नलिखित मंत्रो के द्वारा करें।

1. **गणेश गौरी**
2. **पद्मा**
3. **शची**
4. **मेधा**
5. **सावित्री**
6. **विजया**
7. **जया**
8. **देव सेना**
9. **स्वधा**
10. **स्वाहा**
11. **मातरः**
12. **लोकमातरः**
13. **धृतिः**
14. **पुष्टिः**
15. **तुष्टिः**
16. **आत्मनः कुलदेवता**

- **गणेशम्**

**ॐ गणानांत्वा गणपति ७ हवामहे, प्रियाणां त्वा प्रियपति ७ हवामहे, निधीनां त्वा निधिपति ७ हवामहे। वसो: मम आहमजानि गर्भधम् त्वमजासि गर्भधम् ॥**

- **ॐ समिपे मातृवर्गस्य सर्वविघ्न हरं सदा।**
  **त्रैलोक्य पूजितं देवं गणेशं स्थापयाम्यहम् ॥**
- ॐ भुर्भुवः स्वः गणपतये नमः। गणपतिम् आवाह्यामि स्थापयामि।

**1. गौरीम्**

**ॐ आयं गौ: पृश्निर क्रमीदसदन् मातरं पुर:। पितरं च प्रयन्त्स्व: ॥**

- **हिमाद्रि तनयां देविं वरदां दिव्य शंकर प्रियाम्।**
  **लंबोदरस्य जननीं गौरिम् आवाहयाम्यहम् ॥**
- ॐ भुर्भुवः स्वः गोर्यै नमः। गौरीम् आवाह्यामि स्थापयामि।

**2. पद्माम्**

**ॐ हिरण्यरूपा उषसो विरोक उभाविन्द्रा उदिथ: सूर्यश्च।**
**अरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च मित्रोसि वरुणोसि ॥**

- **सुवर्णा भांपद्महस्तां विष्णो र्वक्षस्थल स्थितां।**
  **त्र्यैलोक्य पूजितां देंविं पद्मां आवाहयाम्यहम् ॥**
- ॐ भुर्भुवः स्वः पद्मायै नमः। पद्माम् आवाह्यामि स्थापयामि।

3. **शचीम्**

ॐ निवेशनः संगमनो वसूनां विश्वा रुपाभिचष्टे शचीभिः ।
देव इव सविता सत्यधर्म्मेन्द्रो न तस्थौ समरे पथीनाम् ॥

- दिव्यरुपां विशालाक्षीं शुचिं कुंडल धारिणीम् ।
रक्त मुक्ता द्यलंकारां शचीम् आवाहयाम्यहम् ॥
- ॐ भुर्भुवः स्वः शच्यै नमः । शचीम् आवाह्यामि स्थापयामि ।

4. **मेधाम्**

ॐ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥

- विश्वेस्मिन् भूरिवरदां जरां निर्जर सेविताम् ।
बुद्धि प्रबोधिनीं सौम्यां मेधाम् आवाहयाम्यहम् ॥
- ॐ भुर्भुवः स्वः मेधायै नमः मेधाम् आवाह्यामि स्थापयामि ।

5. **सावित्रीम्**

ॐ सविता त्वा सवाना ७ सुवतामग्निर्गृहपतीना ७ सोमो वनस्पतीनाम् ।
बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ॥

- जगत्सृष्टिकरीं धात्रीं देवीं प्रणव मातृकाम् ।
वेदगर्भां यज्ञमयीं सावित्रिं स्थामयाम्यहम् ॥
- ॐ भुर्भुवः स्वः सावित्र्यै नमः । सावित्रीम् आवाह्यामि स्थापयामि ।

6. **विजयाम्**

ॐ विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ २ ऽउत ।
अनेशन्नस्य या ऽइषव ऽआभुरस्य निषङ्गधिः ॥

- सर्वास्त्र धारिणीं देवीं सर्वाभरण भूषिताम् ।
सर्वदेव स्तुतां वन्द्या विजयां स्थापयाम्यहम् ॥
- ॐ भुर्भुवः स्वः विजयायै नमः । विजयाम् आवाह्यामि स्थापयामि ।

7. **जयाम्**

ॐ बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥

- सुरारिमथिनीम् देवीं देवानामभयप्रदाम् ।
त्रैलोक्य वन्दितां शुभ्रां जयाम् आवाहयाम्यहम् ॥
- ॐ भुर्भुवः स्वः जयायै नमः । जयाम् आवाह्यामि स्थापयामि ।

8. **देवसेनाम्**

ॐ इन्द्र आसान् नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेना नामभि भञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥

- मयूर वाहनां देवीं खड्ग शक्ति धनुर्धराम ।
आवाहयेद् देवसेनां तारकासुर मर्दिनीम् ॥
- ॐ भुर्भुवः स्वः देवसेनायै नमः । देवसेनाम् आवाह्यामि स्थापयामि ।

**9. स्वधाम्**

**ॐ पितृभ्य: स्वधायिभ्य: स्वधा, नम: पितामहेभ्य: स्वधायिभ्य: स्वधा, नम: प्रपितामहेभ्य: स्वधायिभ्य: स्वधा नम:। अक्षन् पितरोऽ मीमदन्त, पितरोती तृपन्त पितर:, पितर: शुन्धध्वम् ॥**

- **अग्रजा सर्वदेवानां कव्यार्थं प्रतिष्ठिता।**
  **पितृणां तृप्तिदां देवीं स्वधाम् आवाहयाम्यहम् ॥**
- ॐ भुर्भुव: स्व: स्वधायै नम: । स्वधाम् आवाह्यामि स्थापयामि ।

**10. स्वाहाम्**

**ॐ स्वाहा प्राणेभ्य: साधिपतिकेभ्य:। पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा वायवे स्वाहा। दिवे स्वाहा सूर्याय स्वाहा ॥**

- **हविर्गृहित्वा सततं देवेभ्यो या प्रयच्छति।**
  **तां दिव्यरुपां वरदां स्वाहाम् आवाहयाम्यहम् ॥**
- ॐ भुर्भुव: स्व: स्वाहायै नम: । स्वाहाम् आवाह्यामि स्थापयामि ।

**11. मातृ**

**ॐ आपो अस्मान् मातर: शुन्धयन्तु घृतेन नो घृतप्व: पुनन्तु।**
**विश्व ७ हि रिप्रं प्रवहन्ति देवीरुदिदाब्भ्य: शुचिरा पूतएमि।**
**दीक्षातपसोस्तनूरसि तां त्वा शिवा ७ शग्मां परिदधे भद्रं वर्णम पुष्यन ॥**

- **आवाहयाम्यहं मातृ: सकला लोक पूजिता: ।**
  **सर्वकल्याण रूपिण्यो वरदा दिव्य भूषिणा: ॥**
- ॐ भुर्भुव: स्व: मातृभ्यो नम: । मातृम् आवाह्यामि स्थापयामि ।

**12. लोकमातृ**

**ॐ रयिश्चमे रायश्चमे पुष्टंचमे पुष्टिश्चमे विभुचमे प्रभुचमे पूर्णंचमे पूर्णतरंचमे कुयवंचमे क्षितंचमे न्नंचमे क्षुच्चमे यज्ञेनकल्पन्ताम् ॥**

- **आवाहये ल्लोकमातृर्जयंती प्रमुखा:शुभा: ।**
  **नानाभीष्ट प्रदा: शान्ता: सर्वलोकहिता वहा: ॥**
- ॐ भुर्भुव: स्व: लोकमातृभ्यो नम: । लोकमातृम् आवाह्यामि स्थापयामि ।

**13. धृतिम्**

**ॐ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।**
**यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मन: शिवसंकल्पमस्तु ॥**

- **सर्व हर्ष करीं देवीं भक्तानामभय प्रदाम्।**
  **हर्षोत्फुल्लास्य कमलां धृतिम् आवाहयाम्यहम् ॥**
- ॐ भुर्भुव: स्व: धृत्यै नम: । धृतिम् आवाह्यामि स्थापयामि ।

14. **पुष्टिम्**

**ॐ अङ्गान्यात्मन् भिषजा तदश्विनात्मानमङ्गैः समधात् सरस्वती ।**
**इन्द्रस्य रूप ७ शतमानमायुश्चन्द्रेण ज्योतिरमृतं दधानाः ॥**

- **पोषयन्तीं जगत्सर्वं स्वदेह प्रभवैर्नवैः ।**
  **शाकैः फलैर्जलैरत्नैः पुष्टिम् आवाहयाम्यहम् ॥**
- ॐ भुर्भुवः स्वः पुष्टयै नमः । पुष्टिम् आवाह्यामि स्थापयामि ।

15. **तुष्टिम्**

**ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।**
**सनः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥**

- **देवैराराधितां देवीं सदा सन्तोष कारिणीम् ।**
  **प्रसाद सुमुखीं देवीं तुष्टिम् आवाहयाम्यहम् ॥**
- ॐ भुर्भुवः स्वः तुष्टयै नमः । तुष्टिम् आवाह्यामि स्थापयामि ।

16. **आत्मनः कुलदेवताम्**

**ॐ प्राणाय स्वाहा अपानाय स्वाहा व्यानाय स्वाहा ।**
**चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥**

- **पत्तने नगरे ग्रामे विपिने पर्वते गृहे**
  **नानाजाति कुलेशानीं दुर्गाम् आवाहयाम्यहम् ॥**
- ॐ भुर्भुवः स्वः आत्मनः कुलदेवतायै नमः आत्मनः कुलदेवताम् आवाह्यामि स्थापयामि ।

- हस्ते अक्षतानादाय मनोजूतिरीति मन्त्रेण गणपति सहिताः श्रीगौर्यादिषोडशमातरः सुप्रतिष्ठिताः वरदा भवन्तु ।
- इति प्रतिष्ठाप्य नाममन्त्रैः श्रीसूक्तेन वा षोडषोपचारैः सम्पूजयेत् ।
- **प्रार्थना**

**आयुरारोग्यमैश्वर्यं ददध्वं मातरो मम ।**
**निर्विघ्नं सर्वकार्येषु कुरुध्वं सगणाधिपाः ॥**

- **हरात्मज चतुर्बाहो वारणास्य महोदर ।**
  **प्रसन्नो भवमह्यं त्वं गौरीपुत्र नमोस्तुते ॥**
- **ब्रह्माणी कमलेन्दु सौम्यवदना माहेश्वरी लीलया ।**
  **कौमारीं रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ॥**
- **वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा ।**
  **चामुण्डा गणनाथ रुद्र सहिता रक्षन्तु नो मातरः ॥**

- अनया पूजया गणेश सहित गौर्यादि षोडशमातरः प्रीयन्तां न मम ।

**॥ इति षोडशमातृका पूजनं समाप्तम् ॥**